क्षीणानान्तु बन्ध्यामयनाशनः स्यात्
कल्याणको नाम गुड़ः प्रसिद्धः ॥
तैले मनाक् त्रिवृत् भृष्टा त्रिसुगन्धिपलं पलम्।
सिद्धे निधेयमत्रैव गुड़े कल्याणपूर्व्वके ॥"
इति कल्याणकगुड़ः ॥*॥
"पिप्पली पिप्पलीमूलं चव्यकं गजपिप्पली ।
धान्यकञ्च विड़ङ्गानि यवानी मरिचानि च ॥
त्रिफला चाजमोदा च नलिनी जीरकस्तथा।
सैन्धवं रौमकं चापि सामुद्रं रुचकं विड़म् ॥
आरग्वधश्च त्वक् पत्रं सूक्ष्मैला चोपकुञ्चिका।
शुण्ठी शक्रयवाश्चैव प्रत्येकं कर्षसम्मिता ॥
गुडूच्याः पलान्यत्र चत्वारि कथितानि हि।
त्रिवृतायाः पलान्यष्टौ गुड़स्यार्द्धतुला तथा ॥
तिलतैलपलान्यष्टौ चामलक्या रसस्य तु।
प्रस्थत्रयमिदं सर्व्वं शनैर्मृद्वग्निना पचेत् ॥
उड़म्बरं चामलकं वादरं वा यथाफलम् ।
तावन्मात्रमिदं खादेन्नचयेद्वा यथानलम् ॥
निखिलान् ग्रहणीरोगान् प्रमेहांश्चैकविंशतिम्।
उरोघातं प्रतिश्यायं दौर्ब्बल्यं वह्निसंचयम् ॥
ज्वरानपि हरेत् सर्व्वान् कुर्य्यात् कान्तिं मतिं स्वरम् ।
पिचुपाठान्वयाहन्ति रक्तपित्तञ्च चिद्ग्रहम् ॥
धातुक्षीणो वयःक्षीणः स्त्रीषु क्षीणः क्षयी च यः।
तेभ्यो हितश्च बन्ध्यायै महाकल्याणको गुड़ः ॥"
इति महाकल्याणकगुड़ः ॥*॥
'कुष्माण्डानां सुपक्वानां खिन्नानां लिकुचत्वचाम्
सर्पिःप्रस्थे पलशतं ताम्रपात्रे शनैः पचेत् ॥
पिप्पली पिप्पलीमूलं चित्रकं गजपिप्पली ।
धान्यकानि विड़ङ्गानि नागरं मरिचानि च ॥
त्रिफला चाजमोदा च कलिङ्गाजाजिसैन्धवम्।
एकैकस्य पलं चैकं त्रिवृतोऽष्टपलानि च ॥
तैलस्य च पलान्यष्टौ गुड़ात् पञ्चाशदेव तु।
आमलक्या रसस्यात्र प्रस्थत्रयमुदीरितम् ॥
तावत् पाकं प्रकुर्व्वीत मृदुना वह्निना भिषक्।
यावत् दर्व्वीप्रलेपः स्यात् तदैनमवतारयेत् ॥
औडुम्बरं चामलकं वादरं वा यथाफलम् ।
तावन्मात्रमिदं खादेन्नचयेद्वा यथानलम् ॥
अनेनैव विधानेन प्रयुक्तश्च दिने दिने ।
विहन्ति ग्रहणीरोगान् कुष्ठान्यर्शोभगन्दरान्॥
ज्वरमानाहहृद्रोगगुल्मोदरविसूचिकाः ।
कामलां पाण्डुरोगञ्च प्रमेहांश्चैकविंशतिम् ॥
वातशोणितवीसर्पदद्रुपचहलीमकान् ।
वातपित्तकफान् सर्व्वान् दुष्टान् शुद्धान् समाचरेत्
व्याधिक्षीणा वयःक्षीणा स्त्रीषु क्षीणाश्च ये नराः।
तेभ्यो हितो गुड़ोऽयं स्यात् बन्ध्यानामपि पुत्त्रदः।
वृष्यो बल्यो बृंहणश्च वयसः स्थापनः परः ॥"
इति कुष्माण्डकल्याणगुड़ः ॥*॥
अतीसाराधिकारलिखितं विल्वं तैलञ्चात्र हितम्। इति ग्रहणीरोगाधिकारः। इति भावप्रकाशः।
सङ्ग्राम, ङ ञ त् क युद्धे । इति कविकल्पद्रुमः॥ (अदन्त चुरा०-आत्म०-उभ०-च-अक०-सेट्।) असंसंग्रामत् । ङ, संग्रामयते। ङ, संग्रामयति संग्रामयते। ञितैवोभयपदसिद्धौ ङित्करणं पफलवत्कर्त्तरि आत्मनेपदार्थम्। एवं सर्व्वत्र। किन्तु अयमात्मनेपदीति प्राञ्चः कदाचित् परस्मैपदार्थो ञकारः। इति दुर्गादासः ॥

सङ्ग्रामः, पुं, (सङ्ग्राम + णिच् + भावे घञ्।) युद्धम्। इत्यमरः ॥ (यथा, मनुः। ७। ८७।
"न निवर्त्तेत संग्रामात् क्षात्त्रं धर्म्ममनुस्मरन्॥")

सङ्ग्रामपटहः, पुं, (सङ्ग्रामस्य पटहः।) रणवाद्यम्। यथा, त्रिकाण्डशेषे।
"रणतूर्य्यन्तु संग्रामपटहोऽभयडिण्डिमः।"

सङ्ग्राहः, पुं, (संग्रहणमिति। सं + ग्रह + "समि मुष्टौ।" ३। ३। ३६। इति घञ्।) फलकस्य मुष्टिः। फलकग्रहणस्थानमिति यावत्। मुष्टिबन्धनक्रिया। तत्पर्य्यायः। मुष्टिबन्धः २। द्वे मुष्टिबन्धनक्रियायाम्। मुष्टेर्बन्धोऽङ्गुलिविन्यासो मुष्टिबन्धः। मुष्टिना बन्धो दृढ़ग्रहणं संग्राह इत्यपरे। मुष्टावेव संग्रह इत्यन्ये। मुष्टिः स्त्रियाञ्च संग्रह इति वोपालितः। संपूर्व्वग्रहेर्घञ् संग्राहः। इत्यमरभरती ॥ (यथा, महाभारते। ५। १५४। २०।
"सुसंग्राहाः सुसम्पन्नाः हेमभाण्डपरिच्छदाः।"
"पदातिनो नरास्तत्र बभूवुर्हेममालिनः ॥")

सङ्ग्राही, [न्] पुं, (संगृह्णाति मलमिति। सं + ग्रह + णिनिः।) कुटजवृक्षः। इति राजनिर्घण्टः॥ (मलसन्धारके, त्रि। यथा, सुश्रुते। १। ४५।
"दीपनं लघु संग्राहि श्वासकासास्रपित्तनुत् ॥"
संग्राहके, त्रि। यथा, कामन्दकीये। ४।१०।
"प्रख्यातवंशमक्रूरं लोकसंग्राहिणं शुचिम्।
कुर्व्वीतात्महिताकाङ्क्षी परिवारं महीपतिः॥")

सङ्घः, पुं, (सं + हन + "संघोद्घौ गणप्रशंसयोः।" ३। ३। ८६। इति अप् टिलोपो घत्वञ्च निपात्यते।) समूहः। इत्यमरः ॥ सजातीयानां विजातीयानाञ्च जन्तूनां द्वन्द्वे सङ्घसार्थौ स्याताम्। यथा भिक्षुसङ्घः वणिक्सार्थः। संहन्यते परिच्छिद्यतेऽनेनेति सङ्घः। संपूर्व्वात् हनधातोर्नाम्नीति डः निपातनात् हस्य घः। इति भरतः ॥ (यथा, महाभारते। १। १२०। १।
"तत्रापि तपसि श्रेष्ठे वर्त्तमानः स वीर्य्यवान्।
सिद्धचारणसङ्घानां बभूव प्रियदर्शनः ॥")

सङ्घचारी, [न्] पुं, (सङ्घेन चरतीति। चर + णिनिः।) मत्स्यः। इति हेमचन्द्रः॥ बहुभिः सहगामिनि, त्रि ॥ (यथा महाभारते। ९। ११। १९।
"ततस्तद्युद्धमत्युग्रमभवत् सङ्घचारिणाम् ॥")

सङ्घजीवी, [न्] पुं, (सङ्घेन जीवतीति। जीव + णिनिः।) व्रातीनः। इति हेमचन्द्रः ॥

सङ्घट्टः, पुं, (सं + घट्ट + घञ्।) अन्योन्यविमर्द्दनम्। यथा, —
"नैवान्यत्र मदान्धसिन्धुरघटासङ्घट्टघण्टारणत्-
कारत्रस्तसमस्तवैरिवनितालब्धस्तुतिर्भूपतिः।"
इति वाल्मीकिकृतगङ्गाष्टकस्तोत्रम् ॥
गठनम्। यथा,—
"मृदाहरणसङ्घट्टप्रतिष्ठाह्वानमेव च।
स्नपनं पूजनञ्चैव विसर्ज्जनमतः परम् ॥"
इति तिथ्यादितत्त्वम् ॥
चक्रविशेषश्च ॥

सङ्घट्टचक्रं, क्ली, (संघट्ट एव चक्रम्।) युद्धविचारार्थनक्षत्राङ्कितचक्रविशेषः। यथा,—
"अश्विन्यादि लिखेच्चक्रं सप्तविंशतितारकैः।
त्रिकोणं नवभिर्व्वेधः कर्त्तव्यस्त्रिशिखाकृतिः ॥
अश्विनीरेवतीवेधो अश्लिनीज्येष्ठयोस्तथा।
मघापुष्णोः सर्पपित्रोरश्लेषामूलयोस्तथा ॥
ज्येष्ठामूलकयोर्व्वेधो भवेत् सङ्घट्टचक्रके।
एवं सङ्घट्टचक्रे च कार्य्या ऋक्षगता ग्रहाः ॥
भूपनामर्क्षसङ्घट्टे युद्धं भवति नान्यथा।
निर्व्वेधे सौम्यवेधे च युद्धं नास्ति रणेशयोः ॥
क्रूरवेधे भवेद्युद्धं तत्काले घोरदारुणम्।
युद्धाकाङ्क्षी भवेद्राजा यस्य भं क्रूरवेधितम् ॥
युद्धद्वेषी भवेत् सौम्यैर्भे च वेधविवर्ज्जिते।
सौम्यक्रूरविभागेन मित्रामित्रक्रमेण च।
वक्रातिचारगत्या च युद्धमत्रास्ति नास्ति च ॥"
इति स्वरोदये सङ्घट्टकालानलचक्रम् ॥

सङ्घट्टनं, क्ली, स्त्री, (सं + घट्ट + ल्युट्। स्त्रियां युच्।) मेलनम्। गठनम्। घटना। इति केचित् ॥ (यथा, साहित्यदर्पणे। ९। ६२४।
"पदसंघट्टना रीतिरङ्गसंस्थाविशेषवत्।
उपकर्त्त्री रसादीनां सा पुनः स्याच्चतुर्व्विधा॥")

सङ्घट्टा, स्त्री, (संघट्टते इति। सं + घट्ट + अच् + टाप्।) लता। इति शब्दचन्द्रिका।

सङ्घतलः, पुं, (सङ्घे संहते तले यत्र।) मिलितप्रतलद्वयम्। इत्यमरः ॥ योड़ हात इति भाषा॥

सङ्घपुष्पी, स्त्री, (संघानि पुष्पाणि यस्याः।) धातकी। इति राजनिर्घण्टः ॥

सङ्घर्षः, पुं, (सं + घृष + घञ्।) सङ्घर्षणम्। (यथा, महाभारते। १। १८। २३।
"तेषां सङ्घर्षजश्चाग्निरर्च्चिर्भिः प्रज्वलन् मुहुः।
विद्युद्भिरिव नीलाभ्रमावृणोत् मन्दरं गिरिम्॥")
स्पर्द्धा। (यथा, महाभारते। १। ७६। ५।
"सुराणामसुराणाञ्च समजायत वै मिथः।
ऐश्वर्य्यं प्रति संघर्षस्त्रैलोक्ये सचराचरे ॥")
संसर्पः। इति शब्दरत्नावली ॥

सङ्घाटिका, स्त्री, (संघाटयतीति। सं + घट + णिच् + ण्वुल्। टापि अत इत्वम्।) युग्मम्। कुट्टनी। जलकण्टकम्। इति मेदिनी ॥ घ्राणम्। इति विश्वः ॥

सङ्घातः, पुं, (सं + हन + घञ्।) समूहः। (यथा, कुमारे। ५। ५५।
"न जातु बाला लभते स्म निर्वृतिं
तुषारसङ्घातशिलातलेष्वपि ॥")
नरकभेदः। इत्यमरः ॥ हननम्। इति मेदिनी। (निविड़संयोगः। यथा, कुमारे। २। ११।
"द्रवः सङ्घातकठिनः स्थूलः सूक्ष्मो लघुर्गुरुः।
व्यक्तो व्यक्तेतरश्चासि प्राकाम्यं ते विभूतिषु ॥")